RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484

॥ ओ३म् ॥

काल: पचति भूतानि
काल: संहरते प्रजा:।
काल: सुप्तेषु जागर्ति
कालो हि दुरतिक्रम:॥

( चाणक्य-नीति )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवाद:

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥

न पश्यति च जन्मान्धः
कामान्धो नैव पश्यति।
न पश्चति मदोन्मत्तो
ह्यर्थी दोषान् न पश्यति॥

( चाणक्य-नीति )

संपादकीयकार्यालय: ए-२/३२, वजीराबाद मार्ग:, भजनपुरा, देहली-११००५३, दूरभाष: ९३११०८६७५१
ई-मेल: sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

卐 वर्षम्-८ 卐 अंक:-१२ ( १८० ) 卐 १६ दिसम्बर: २०१८ त: ३१ दिसम्बरमास: २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११६ 卐 पृष्ठम्-८

## देववाणी-परिषद: त्रिचत्वारिंशत्-स्थापनादिवससमारोह:

उत्तमनगरम्। देववाणीपरिषद दिल्ली स्व 43 स्थापना दिवस रमालय, वाणीविहार, नवदेहल्यां सोल्लासेन समायोजितवान। मुख्यातिथि डॉ. कामदेवझा (प्राचार्य.डी.ए.वी.महा.पिहोवा) एवं अखिलभारतीय प्राच्यविद्यासम्मेलन पुणे इत्यस्य 50 तम अधिवेशनस्य कार्यसमिते: सचिव उक्तवन्तौ यत् संस्कृतस्योत्याने स्वयंसेवी संस्थाया: महत्वपूर्ण योगदानमस्ति। देववाणीपरिषद: अन्य गतिविधयातिरिक्त सद्ग्रन्थानां प्रकाशनं कृत्वा संस्कृतस्य प्रचार-प्रसारे महत्वपूर्ण योगदानं




ददाति। सारस्वतातिथि डॉ. नीरजझा महोदयं परिषदस्य संरक्षिका श्रीमती रमादेवीशुक्ला अर्वाचीनसंस्कृतम् इत्यस्य पुरातन अंकं दत्तवती।

अस्मिन्नवसरे धर्मेन्द्रमाणिस्वांत सुखाय संस्कृत सम्मानाय बंगलौरस्य श्री जी.एस.श्रीनिवासमूर्ते:

शेषभाग:द्वितीयपुटे

## आयुर्वेदे सुस्कृतस्योपादेयताविषये एकदिवसीयराष्ट्रियसंगोष्ठी

कुरूक्षेत्र:। श्रीकृष्णा आयुष वि.विद्यालय कुरूक्षेत्रे ह.सं.अकादमी पंचकूला, विश्व आयुर्वेद परिषद हरियाणा इत्यस्य संयुक्त तत्वावधाने "आयुर्वेदे संस्कृतस्य उपादेयता" विषये एकदिवसीय राष्ट्रिय संगोष्ठ्स्यायोजनमभवत्। अस्यां संगोष्ठ्यां प्रो. बलदेवकुमारधीमानजी (कुलपति श्री.कृष्ण




आयुष वि.वि.कु.), डॉ. ऋषिराजवशिष्ठजी (अध्यक्ष भा.चि.प.हरि.) डॉ. अश्विनीभार्गजी, डॉ. प्रेमचन्द्रशास्त्रीजी (उपा.सं.अका.उत्तराखण्ड), डॉ.पी.सी.मंगलजी (कार्यक्रम संयोजक) डॉ. मनोजविरमानीजी, प्रो. सुरेशजी, डॉ. रामनिवासजी (अ.सं.अका.हरि.) डॉ. हरिप्रकाशशर्माजी (प्रा. इ.गा.नै.महालाडवा) उपस्थिता: आसन्। संगोष्ठस्याध्यक्षता बलदेवधीमान कृतवान एवं प्रेमचन्द्रशास्त्री मुख्यवक्ता आसीत्। ह.सं. अका. निदेशक सोमेश्वरदत्त अध्यक्ष एवं मुख्य अतिथि आसीत्।

## गौतमनगरस्थितगुरुकुले वैदिकगुरुकुलीय-शास्त्रीय स्पर्धाया आयोजनम्

नवदेहली। श्रीमद्दयानन्दवैदिकपरिषद माध्यमेनायोजित एवं मानवसेवाप्रतिष्ठान माध्यमेनायोजित प्रथम वैदिकीय गुरूकुलीय शास्त्री स्पर्धायायोजनं देवकीनन्दन सभागारे उल्लासेनभवत्।

एवं दयानन्दवैदिकपरिषदस्य अध्यक्ष स्वामी प्रणवानन्दसरस्वती महोदयस्य आर्शिर्वाद एवं मार्गदर्शनेन अष्टाध्यायी काव्यपाठ एवं लेखन, धातुपाठकाव्यपाठ एवं लेखनम् त्रिभाषिय काव्यपाठ,




वैदिकसिद्धान्तप्रश्नमञ्च एवं शास्त्रीय विमर्शेन सहपञ्च प्रतिस्पर्धायायोजनमभवत् एषातु स्पर्धाषु देशत: पञ्चविंशति गुरूकुलानां 119 छात्रछात्राश्च भागं गृहीतवन्त:।

अस्या: स्पर्धाया: पुराकार समारोहे सर्वेनिर्णायिका एवं गुरूकुलत: समागत: मार्गदर्शकान् स्मृति चिन्हेन सम्मानितवान्। विजेतृन् मानवसेवा प्रतिष्ठानेन पुरस्कार राशि प्रदत्तवान। प्रमाणपत्रमेवं आचार्यप्रणवानन्द विश्वनीऽन्यास पौन्धा देहरादूनेन् एकं एकं स्यूतं, पुस्तकं दत्वा स्वामीमहोदयस्य आशिर्वाद प्राप्तवन्त:। अस्मिन् समारोहे स्वामी धर्मैश्वरानन्दसरस्वती प्रो. महावीरअग्रवाल, डॉ. धर्मचन्द्रशास्त्री, पं. सत्यपालपथिक, पंधर्मपालशास्त्री, श्रीवत्सजी, श्रीरामपालशास्त्री, श्रीचन्द्रदेवशास्त्री, आचार्यमनुदेव, आशिर्वादं प्रदत्तवन्त प्रतिस्पर्धाया: संचालक प्रो. डॉ. धनञ्जयजी सर्वेषां स्वागतं कृतवान्।

## भारतस्य गौरवं द्वादश-कुम्भ-धर्मक्षेत्र-कुरुक्षेत्र-विषये राष्ट्रिय संगोष्ठी

कुरुक्षेत्र। अखिल भारतीय सर्वमंगला कुंभ सेवा समिति एवं पाण्डुलिपि हरियाणासंस्कृत अकादमी पंचकूला हरियाणा ग्रन्थ अकादमी पंचकूला, अखिलभारतीय सर्वमंगला कुंभ सेवासमिति एवं पांडुलिपिसंसाधनमेवं संरक्षककेन्द्रकुरूक्षेत्र वि.वि. कुरूक्षेत्रस्य संयुक्ततत्वाववधाने सीनेट हॉल श्रीमदभगवदगीता सदन कुरूक्षेत्र वि.वि.कुरूक्षेत्रे 4,5,6 दिसम्बर 2018 वर्षं भारतस्य गौरव द्वादस कुंभ एवं धर्मक्षेत्र कुरूक्षेत्र विषये राष्ट्रिय संगोष्ठ्या: आयोजनमभवत्। अस्यां संगोष्ठ्यां परमादरणीय पूज्य डॉ स्वामी शाश्वतानन्दगिरीजीमहाराज,



राष्ट्रपति सम्मानेन् सम्मानित डॉ. वेदप्रकाशोपाध्यायजी (से.प्रो.सं.वि.पंजबा वि.वि.) डॉ.सुरेन्द्रमोहनजी (सं. वि.कु.वि.वि.), पूज्य श्रीजगन्नाथपुरीजीमहाराज डॉ पवनसैनी जी (विधायक लाडवा), डॉ. नीताखन्नाजी (कुलसचिव कु.वि.वि.) प्रो. कमलेशझाजी, डॉ. रामजीसिंह (पूर्व कुलपति, पूर्व सांसद), डॉ.कामदेवझा (प्रा.डी.ए.वी.महा.पिहोवा) डॉ.देवीसहायपांडेजी (वेदे 80 किलोग्रामात् अधिक वृहदाकाय ग्रन्थस्य रचनाकार:) डॉ. प्रीतमसिंह जी (सदस्य-हरियाणा गन्थ अकादमी पंचकूला) डॉ. विनयसिंहालजी (स.ह.सं.अका.)डॉ. अशोकसैनीजी (स.ह.सं.अका.) डॉ. रामनिवासजी (प्रान्ताध्यक्ष सं.भा.ह) डॉ. कृष्णारंगाजी (स.वि.कु.वि. वि.) श्रीरामबिलासशास्त्रीजी, श्रीमती शकुंतलाशर्माजी (भाजपा कुरूक्षेत्र) आचार्य नरेशकौशिकजी (वेद विद्यालय.कु.) री पुष्पेन्द्रशास्त्री, डॉ. शिवानीशार्माजी उपस्थिता: आसन्। कार्यक्रमस्यान्ते दिवसे हरियाणा संस्कृतअकादम्या: निदेशक डा. सोमेश्वर दत्त: प्रथमसत्रे अध्यक्षरूपे एवं विशिष्टतिथि रूपे आसीत्।

# D.I.E.T. लखनऊ मध्ये पंचदिवसीया संस्कृतवाग्व्यवहारकार्यशाला प्रारब्धा

लखनऊ। उत्तरप्रदेशसंस्कृतसंस्थानम्-लखनऊ एवं राज्य-शैक्षिक -अनुसंधान-एवं-प्रशिक्षण-परिषद्-लखनऊ इत्यनयोः संस्थयोः संयुक्ततत्वावधानेन पंचदिवसीयायाः संस्कृत-वाग्व्यवहार-कार्यशालायाः समायोजनं दिनांक: 03/22/2018 तः 07/12/2018 पर्यंतम् (D.I.E.T)जिला-शिक्षा एवं प्रशिक्षणसंस्थानम्,लखनउनगरे100 सर्वकारीयविद्यालयीयशिक्षकाणां कृते भविष्यति। अस्याः समुद्घाटनसमारोहः 03/11/2018 दिनांके प्रातः 11 वादने जातः



यत्र मंचसंचालकः नूतनविष्णुरेग्मी(संस्कृतभाषाप्रशिक्षकः) आसीत् । आदौ मंगलाचरणम् विशालभट्टः (संस्कृतभाषाप्रशिक्षकः)कृतवान्। अतिथयश्च सरस्वतीपूजनं,दीपधूपप्रज्वलनं च कृतवन्तः। सरस्वतीवन्दनां डायट तः तिस्रः छात्राः कृतवत्यः ।मनीषशर्मा



(संस्कृतभाषाप्रशिक्षकः)कार्यशालायाः प्रास्ताविकं श्रावितवान्। ततः मंचासीनानां अतिथीनां पुष्पमालाभिः स्वागतं जातम्। कार्यक्रमे मंचासीनाः अतिथयः आसन् श्रीमती रूबीदेवीपाण्डेय (प्रवक्ता हिन्दी,कार्यशालायाः संयोजिका च ,डायट लखनउ), श्रीमती मीरादेवीपाण्डेय (प्रवक्ता संस्कृतम्, कार्यशालायाः अपरा संयोजिका डायट,लखनउ), श्रीमती अणिमा (वरिष्ठ प्रवक्ता,डायट,लखनउ)च । ताःअपि संस्कृतस्य महत्वं प्रतिपादयन् एतादृश्याः संस्कृतकार्यशालायाः आधुनिकपरिप्रेक्ष्ये उपयोगितां च प्रदर्शितवत्यः ।विशालप्रसादेन(संस्कृतभाषाप्रशिक्षकेण)कार्यशालायाः लक्ष्यं,प्रारूपं च स्पष्टीकृतम्।

कार्यशालायां अस्यां मीनाठक्कर ,विशालप्रसादः,मनीषश र्मा ,नूतनविष्णुरेग्मी,मीनाकुमारी च प्रशिक्षकत्वेन उपस्थितानां 100 प्रशिक्षूणां (सर्वकारीयविद्यालयीयशिक्षकाणां)प्रशिक्षणं प्रक्षेपकयंत्रं ,संगणकं च प्रयुज्य PPT SLIDES द्वारा प्रतिदिनं पंचसु दिवसेषु प्रातः10 वादनतः सायं 5 वादनपर्यन्तं (पंचहोरासु पंचसत्राणि)करिष्यन्ति। सर्वेभ्यः प्रशिक्षुशिक्षकेभ्यः लेखनी-संचिका-टिप्पणीपुस्तिका-अभ्याससंचिकाः उत्तरप्रदेशसंस्कृतसंस्थानपक्षतः वितरिताः। धन्यवादज्ञापनं मीनाठक्कर (संस्कृतभाषाप्रशिक्षिका) अकरोत्। इत्थं शान्तिमन्त्रोच्चारणेन समुद्घाटनसमारोहस्यास्य सम्पूर्तिः अभवत्।

संवाददाता-नूतनविष्णुरेग्मी(संस्कृतभाषाप्रशिक्षक,उत्तरप्रदेशसंस्कृतसंस्थानम्-लखनऊ)

# महाविद्यालये प्राथमिकविद्यालये च संस्कृतवाग्व्यवहारकार्यशाला

उत्तरप्रदेशसंस्कृतसंस्थानस्य सरलसंस्कृतसम्भाषणशिबिरयोजनान्तर्गतं 12/12/18 तमे दिनांके सन्तकबीरनगरजनपदे एकत्र गिठनीग्रामस्य ए.बी.आर.एल.महाविद्यालये अपरत्र सन्तकबीरनगरजनपदे एव कोडराग्रामस्य प्राथमिकविद्यालये च संस्कृतवाग्व्यवहारकार्यशालायाः आरम्भः जातः। महाविद्यालये 20 (बी.टी.सी.)छात्राः एवं प्राथमिकविद्यालये 40 छात्राः (1 कक्षातः 5 कक्षापर्यन्तम्)संस्कतं पठन्तः सन्ति ।उभयत्र संस्थानस्य प्रशिक्षकः नूतनविष्णुरेग्मी अध्यापयन् अस्ति। उभयत्र तेषां समयानुकूलतानुसारेण कक्षाः प्रचलन्ति। महाविद्यालयस्य प्राचार्यः श्रीःराकेशकुमारः तत्रत्यः कार्यशालासंयोजकः अस्ति। तथैव प्राथमिकविद्यालयेऽपि तत्रत्यः प्रधानाचार्यः श्रीः प्रदीपकुमारपाण्डेयः कार्यशालासंयोजकरूपेण सहयोगं कुर्वन्



भवति सर्वदा।।उभयत्रापि प्रशिक्षवः स्वस्य विषयग्रहणक्षमतानुसारं संस्कृतभाषायाः ज्ञानं लभन्ते। एतस्याः योजनायाः कारणात् शनैः शनैः सम्पूर्णे प्रदेशे बहवः 'संस्कृते किं न विद्यते?' इति प्रश्नस्योत्तरं (अर्थात् संस्कृते सर्वमप्यस्तीति)अन्विष्यमाणाः सन्ति। एतद्महदुपलब्धिः अस्ति अस्माकम् कृते।

# गीता-जयंती महोत्सवस्योपलक्ष्ये श्रीमद्भगवद्गीता-श्लोकोच्चारण प्रतियोगिता आयोजनम्

हरियाणासंस्कृतअकादमी माध्यमेन गीताजयन्ती समुपलक्ष्ये डी.ए.वी.सेंटेनरी विद्यालये जिलास्तरीय श्रीमदभागवद्गीता श्लोकोच्चारण प्रतियोगितायाः आयोजनमभवत्। अस्यां प्रतियोगितायां




कनिष्ठ एवं वरिष्ठ वर्गे मण्डलस्य 26 विद्यालयतः 52 छात्राः भागं गृहीतवन्तः। अस्याः प्रतियोगितायाः संयोजक रविन्द्रमहोदस्य प्रत्यत्नेन कार्यक्रमः सफलो जातः। डॉ. कामदेवझा महोदयस्य भाषणं बहु प्रभावि आसीत्। मुख्यातिथिरूपे प्रख्यात विद्वाव वेदप्रकाशोपाध्यायजी (सेवानिवृत्त प्रो.पं.वि.वि.) स्व ज्ञानेन सर्वे सम्मोहितं कृतवान। कार्यक्रमे उपाध्याय महोदयं विशेष सम्मानेन सम्मानितं कृतवान यस्य श्रेयः रविन्द्रमहोदयं गच्छति। अकादमी निदेशक दत्तजी एवं कामदेवझा अपि सहभागि आस्ताम्। कार्यक्रमे श्री.आई.डी.भारद्वाजजी (कैथल) श्री ओमप्रकाशजी (कुरूक्षेत्र) श्री राजेश कुमार जी उपस्थिताः आसन्। कार्यक्रमस्याध्यक्षता दत्तजी कृतवान।

# महाविद्यालये प्राथमिकविद्यालये च संस्कृतवाग्व्यवहारकार्यशालायाः समापनम्

उत्तरप्रदेशसंस्कृतसंस्थानस्य सरलसंस्कृतसम्भाषणशिबिरयोजनान्तर्गतं 12/12/18 तमे दिनांके सन्तकबीरनगरजनपदे गिठनीग्रामस्य ए.बी.आर.एल.महाविद्यालये पंचदिवसीयायाः संस्कृतवाग्व्यवहारकार्यशालायाः उद्घाटनं जातमासीत्। एतस्याः समापनं 17/12/18 तमे दिनांके जातम्। तथैव सन्तकबीरनगरजनपदे एव कोडराग्रामस्य प्राथमिकविद्यालये च 12/12/18 तमे



दिनांके एव त्रयोदशदिवसीयासंस्कृतवाग्व्यवहारकार्यशालायाः आरम्भः जातःआसीत्। अत्र समापनम् 29/12/2018 तमे दिनांके जातम्। कार्यशालायां महाविद्यालये 22(बी.टी.सी.)छात्राः एवं प्राथमिकविद्यालये 24 छात्राः (3 कक्षात : 5 कक्षापर्यन्तम्)संस्कतं पठितवन्तः। उभयत्र संस्थानस्य प्रशिक्षकः नूतनविष्णुरेग्मी अध्यापितवान्। उभयत्र तेषां समयानुकूलतानुसारेण कक्षाः प्रचलिता ।महाविद्यालयस्य प्राचार्यः डा राकेशकुमारः तत्रत्यः कार्यशालासंयोजकः आसीत् तथैव प्राथमिकविद्यालयेऽपि तत्रत्यः प्रधानाचार्यः श्रीःप्रदीपकुमारपाण्डेयः कार्यशालासंयोजकरूपेण सहयोगं कृतवान्

सर्वदा उभयत्रापि प्रशिक्षवःस्वस्य विषयग्रहणक्षमतानुसारं संस्कृतभाषायाः ज्ञानं लब्धवन्तः। एतस्याः योजनायाः कारणात् शनैः शनैः सम्पूर्णे प्रदेशे बहवः 'संस्कृते किं न विद्यते' इति प्रश्नस्योत्तरं (अर्थात् संस्कृते सर्वमप्यस्तीति)अन्विष्टवन्तः। एतद्महदुपलब्धिः अस्ति अस्माकम् कृते।

# "लखनऊ D-I-E-T- मध्ये संस्कृतवाग्व्यवहारकार्यशालायाः सम्पूर्तिसमारोहः, प्रमाणपत्रवितरणं च।

–नूतनविष्णुरेग्मी

उत्तरप्रदेशसंस्कृतसंस्थानम्-लखनऊ एवं राज्य-शैक्षिक-अनुसंधान-एवं-प्रशिक्षण-परिषद्-लखनऊ इत्यनयोः संस्थयोःसंयुक्ततत्वावधानेन पंचदिवसीयायाःसंस्कृत-वाग्व्यवहार-कार्यशालायाः समायोजनं दिनांकः ०३/१२/२०१८ तः ०७/१२/२०१८ पर्यंतम् (D.I.E.T)जिल्ला-शिक्षा एवं प्रशिक्षणसंस्थानम्,लखनउ-नगरे जातम् । अस्याःसमुद्घाटनसमारोहः ०३/१२/२०१८ दिनांके प्रातः ११ वादने जातः आसीत्। ०४/१२/२०१८ तमे दिनांके कार्यशालायां सर्वान् संबोधयितुं प्रेरयितुं च संस्कृतभारत्याः अवधप्रान्तस्य विभागसंगठनमंत्रिणःगौरवनायकमहोदयस्य समागमनं जातमासीत।अस्याः कार्यशालायाः समापनसमारोहः ०७/१२/२०१८ तमे दिनांके सम्पन्नः अभवत। अवसरेऽस्मिन्





उत्तरप्रदेशसंस्कृतसंस्थानस्य परियोजनाधिकारी श्रीसुशीलकुमारमहोदयः स्वस्य सारगर्भितं मन्तव्यं तत्र अश्रावयत् । समापनसमारोहे मंचसंचालकःमनीषशर्मा(प्रशिक्षकः)आसीत्।कार्यक्रमे मुख्यातिथित्वेन श्रीःहरिबख्शसिंहः (निदेशकः,उत्तरप्रदेशसंस्कृतसंस्थानम्),अध्यक्षत्वेन डा. पवनकुमारसचानः(प्राचार्यः-D-I-E-Tलखनउ) ,विशिष्टातिथित्वेन श्रीः दिनेशकुमारशर्मा (वरिष्ठप्रशासनिकाधिकारी,उत्तरप्रदेशसंस्कृतसंस्थानम्)सारस्वतातिथित्वेन डा.रत्नेशमणित्रिपाठी (उत्तरप्रदेशसंस्कृतसंस्थानस्य लखनउपरिक्षेत्रसमन्वयकः, बी.के.झामहोदयः (डायट लखनउ,लेखाविभागस्य अधिकारी) चाधिमंचं विराजिताः आसन्। आदौ वैदिकमंगलाचरणम् विशालप्रसादः (प्रशिक्षकः)कृतवान्। प्रशिक्षिकाद्वयं(मीनाठक्करः,मीनाकुमारी च)ध्येयमंत्रं अकारयत्। अतिथयश्च सरस्वतीपूजनं, दीपप्रज्ज्वलनं धूपाघ्रापनं च कृतवन्तः। मंचासीनानां अतिथीनां परिचयपुस्सरं पुष्पमालाभिः स्वागतं संस्कृतप्रशिक्षकेण नूतनविष्णुना कृतम्। कार्यशालायाः प्रास्ताविकं रत्नेशमहोदयः अश्रावयत्। स्वोद्बोधनकथनावसरे मुख्यातिथिवर्येण सर्वेभ्यः आभारं प्रकटितवन्तः। कार्यक्रमस्य अध्यक्षवर्येण पवनमहोदयेन प्रत्येकं विद्यालयेषु एकः संस्कृतप्रशिक्षकः भवेत् इति निदेशकमहोदयः प्रार्थितः ,तेन "संस्कृतं भारतस्य गौरवं,आत्मा च" इति उक्तम्।

ततः प्रशिक्षुगणेषु केचन मंचं आगत्य स्वप्रतिभाप्रदर्शनं (संभाषणम्,गीतगानम्,श्लोकगानम् च)कृतवन्तः। अनुभवकथनं डा. सुधा अवस्थी(अध्यापिका)श्रावितवती।तदनन्तरं तेभ्यः भागग्रहणप्रमाणपत्रवितरणकार्यक्रमः आसीत्।

कार्यक्रमे प्रशिक्षकाः मीनाठक्कर,मीनाकुमारी, मिश्रः,नूतनविष्णुरेग्मी,विशालप्रसादः मनीषशर्मा च उपस्थिताः आसन्। एते एव कार्यशालायां अस्याम् उपस्थितानां ९१ प्रशिक्षूणां

(सर्वकारीयविद्यालयीयशिक्षकाणां) पंचसु दिवसेषु

प्रक्षेपकयंत्रं संगणकं च प्रयुज्य PPT SLIDES द्वारा प्रतिदिनं प्रशिक्षणं गणद्वये (जयगणे,विजयगणे च)कृतवन्तः। एतदतिरिच्य बहुविधव्यवस्थां अपि एते एव दृष्टवन्तः। कार्यशालायां संस्थानपक्षतः डा. रत्नेशमहोदयस्य, D.I.E.T. लखनउतः प्राचार्यस्य पवनमहोदयस्य, (कार्यशालायाः संयोजिकयोः )श्रीमती रुबीपाण्डेयवर्यायाः मीरापाण्डेयवर्यायाश्च महत्वपूर्णा भूमिका आसीत। अन्ते सर्वेषां घन्यवादज्ञापनं मीरादेवीपाण्डेयमहोदया (नोडल अधिकारी,डायट लखनउ) कृतवती शान्तिमन्त्रास्य सहपाठेन च समापनसमारोहस्यास्य पंचदिवसीया-संस्कृतवाग्व्यवहारकार्यशालायाः च सम्पूर्तिः अभवत्।

# शिक्षाशास्त्री-आचार्य-उपाधि-धारकानां भविष्येन सह दुर्नीतिः

हरियाणायां 2015 तमे वर्षे पी.जी.टी. संस्कृत इत्यस्मिन् पदे शिक्षाशास्त्री छात्रान् साक्षात्कार प्रक्रियया परित्यक्त निष्कासनस्य समस्या समागता। अत्र पुनः त्रिवर्षात् प्रच्यल्यमान समस्यायां साक्षात्कारः आरम्भो जातः।

प्रदेशे चतुराशिति अभ्यार्थिनां चयनय पूर्वं जातम् परञ्च इदानीं तान् अयोग्यं उक्तवान। एतस्य सूचना अभ्यार्थि उच्चन्यायालये कृतवान। तेषां कथनमस्ति विज्ञापनानुसारेण चयन प्रक्रिया भवितव्यम्। आयोगस्य कथनमस्ति एतेषां प्रमाणपत्रे बी.एड इत्यनेन सह शिक्षाशास्त्री इत्यपि अस्ति। अनेन कारणेन अयोग्यः। परञ्च रा.सं.स.उक्तवान बी.एड. इत्यस्य संस्कृतानुवादोऽस्ति शिक्षाशास्त्री।

एतस्य विरोधे संस्कृत हितैषी संघ जनवरीमासस्य एकादश दिनांके जन्तरमन्तरे प्रदर्शनं करिष्यति।

एतस्य कथनास्ति–

1. नूतन परिणामं सर्वकारः निरस्त करोतु
2. शिक्षाशास्त्री उपाधिधारकान् पुनः सम्मिलितं कृत्वा परिणामस्य घोषणा करोतु।

खादी वस्त्र ही नहीं, विचार है !
आदर्श ग्रामोद्योग समिति, दिल्ली
खादी वस्त्रों का विशाल भण्डार
✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल (रेडीमेड) ✪ रेशम साड़ी (रिल्ड) ✪ रेशम स्पन व रेडीमेड ✪ पोली खादी
सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।
खादी ग्रामोद्योग भवन
✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, (उ० प्र०)
✪ शेरपुर चौक, करावल नगर, दिल्ली-110094
फोनः-0120-2631855, 9899334204

ओ३म्
भारत में फैले संप्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज़, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण (द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | मुद्रित मूल्य | प्रचारार्थ | |
|---|---|---|---|
| ● प्रचार संस्करण (अजिल्द) 23×36÷16 | 50 रु. | 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| ● विशेष संस्करण (सजिल्द) 23×36÷16 | 80 रु. | 50 रु. | |
| ● स्थूलाक्षर सजिल्द 20×30÷8 | 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति सत्यार्थ प्रकाश के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

पाठकानां कृते सूचनाः-
कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते।
वित्तकोषविवरणम्-
Sanskrit samvad,
Current A/C No. 22490200000142,
Indian Overseas Bank, Yamuna Vihar, Delhi-110053
IFC Code- IOBA0002249

# सम्पादकीयम्

## अये सुरभारतीसमुपासकाः देशवासिनः!

सादरं नमोनमः।

विज्ञायत एवास्माकं भारतदेशः पर्वणां महोत्सवानां तीर्थानां चाकरो वर्तते। प्रतिमासं प्रतिपक्षं वा किमपि पर्व आयात्येवास्माकं मनोमोदायेति। यद्यपि संस्कृतज्ञानां भारतीयसंस्कृतिसमुपासकानां नववर्षागमः चैत्रशुक्लपक्षे आयाति। यदा वृक्षेषु नवपल्लवपुष्पफलानि दृष्टिं हरन्ति। सत्यमेव सैष नववर्षः यत्र प्रकृतेः प्रतिकणं प्रसीदति। कोकिला गायति, मयूरो नृत्यति, हरिणो धावन्ति, नाधिकं शैत्यं नाधिकं वा ग्रीष्मो जनं बाधते। समशीतोष्णकाले नववर्षं आयाति। परन्तु आंग्लानां बन्धूनां तु जनवरीमासत एव नववर्षं आरभ्यते। अस्तु अस्मिन् जनवरीमासे अस्माकं मकरसंक्रान्तिरुत्सवः सर्वानपि जनान् मोहयतीवेति। मकरं गते सूर्ये भारतीयाः विविधप्रदेशेषु स्वपरम्परानुसारं सुखदमायोजनं कुर्वते। उत्तरभारते खिचड़ीतिनाम्नापि विशेषतः पर्वेदं सादरं सामोदं समाज्यते। अस्मादेव दिवसात् वैवाहिककार्यारम्भो दृश्यते। परमं पावनमिदं पर्व वर्तते। अस्मिन् वर्षे तु प्रयागराजे कुम्भमहोत्सवो समायोजितो वर्तते। तत्रत्यं दृश्यं तु दर्शनीयमेवास्ति। अकल्पनीया मायानगरीव मुक्तिदायिनी तीर्थभूमिरियं सनातनधर्मावलम्बिनां मनांसि हरत्येव। न केवलं भारतीयानामेव अपितु वैदिकानामपि समागमः दर्शनीयतां गमिष्यतीति को न जानाति।

अनेन पर्वणा हिन्दूनां विशेषतः संगमस्नानानार्थिनां अलौकिकी श्रद्धाभावना दृष्टिं नन्दयतीव। अहं तु मन्ये यो भारतीयः कुम्भस्नानं कुम्भदर्शनं कुरुते तस्य मनः प्रफुल्लं भवति, हृदयमस्य पावनतां याति। सर्वथा कल्मषशून्योऽयं मान्यतानुसारं मुक्तिं विन्दति।

अतः ब्रवीमि

निष्फलं जीवनं तस्य नरस्येति कलौ सखे।
कुम्भस्नानं कृतं येन न प्रयागे स पुण्यवान्।।

अन्ते सर्वेषां भवतां मंगलानि कामयमानाहं कुम्भस्नानाय सज्जीभवामि।

## वेदामृतम्

**( ऋग्वेदभाष्यम् )**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना।**
**पिबा मित्रस्य धामभिः ।।१०।।**

अर्थ-यह विद्युत्रूप अग्नि ब्रह्माण्ड में रहनेवाले पवन तथा शरीर में रहनेवाले प्राणों के साथ वर्तमान होकर सब पदार्थों से रस को ग्रहण करके उगलता है, इससे यह मुख्य शिल्पविद्या का साधन है।। १०।।

अब अगले मन्त्र में अग्नि शब्द से ईश्वर का उपदेश किया है

**त्वं होता मनुर्हितोऽग्ने यज्ञेषु सीदसि।**
**सेमं नो अध्वरं यज।।११।।**

अर्थ-जिस ईश्वर ने सब मनुष्य आदि प्राणियों के शरीर आदि पदार्थों को उत्पन्न करके धारण किया है, तथा जो यह सब कर्म, उपासना तथा ज्ञानकाण्ड में अतिशय पूजने के योग्य है, वही इस जगरूपी यज्ञ को सिद्ध करके हम लोगों को सुखयुक्त करता है।।११।।

फिर अगले मन्त्र में भौतिक अग्नि के गुणों का उपदेश किया है।

**युवा ह्यरुषी रथे हरितो देव रोहितः।**
**ताभिर्देवाँ इहा वह।।12।।**

अर्थ-विद्वानों को कला और विमान आदि यानों में अग्नि आदि पदार्थों को संयुक्त करके इनसे इस संसार में मनुष्यों के सुख के लिए दिव्य पदार्थों का प्रकाश करना चाहिए।।12।।

सब देवों के गुणों के प्रकाश तथा क्रियाओं के समुदाय से इस चौदहवें सूक्त की सङ्गति पूर्वोक्त तेरहवें सूक्त के अर्थ के साथ जाननी चाहिए।

**यह चौदहवाँ सूक्त और सत्ताईसवाँ वर्ग पूरा हुआ।**

[१५] अथ द्वादशचय्स्य पञ्चदशसूक्तस्य कण्वो मेधातिथिः । ऋतवः इन्द्रः; मरुतः; त्वष्टक; अग्निः; इन्द्रः मित्रावरुणः; अश्विनौ; अग्निश्च देवताः । गायत्री छन्दः । षड्जः स्वरः।।

# अवसादनिवारणे योगः

-विजय कुमार झा( शोधछात्रः )
(शिक्षाशास्त्र विभाग)
श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विद्यापीठ नई दिल्ली110016

यथा सर्वेजानन्त्येव एव यत् अस्मिन् वर्तमान यांत्रिक भौतिक जीवनशैल्यामवसादः प्रत्येकमानवस्य जीवने विषमिव मिश्रितोअस्ति । अस्मिन संसारे कोपि तादृशः जनः नास्ति यः स्वस्यजीवने अवसादस्यानुभवः न कृतवान् । संप्रति संपूर्णेविश्वे अवसादैका जटिल मानसिक समस्या रुपे दृष्टिगोचरो भवति प्रायः ये. मानसिक एवं शारीरिक व्याधयःसन्ति तस्य मूलकारणरुपे अवसाद एव मन्यते।

वैज्ञानिकाः हृदयस्यरोगे तथा कार्करोगे अपि अवसादस्य भूमि काम् स्वीकुर्वन्ति वस्तुतः अवसादःकिम् भवति? कम् भवति? एवं अस्य अवसादस्य निराकरण कोअपि उपायोअस्ति एतेषाम् प्रश्ननाम् समाधानाय चर्चां कुर्मः

अवसादः किमस्तिझअवसादस्यअर्थमनोवैज्ञानिकाः विभिन्न प्रकारेणस्पष्टंकृतवन्तः। वस्तुतः अवसादःमानसिकरोगः नास्ति अपितु मानसिकरोगाणां मूलकारणमस्ति ।वयम्वक्तुंशक्नुमःयत् मनस्थिति एव परिस्थिति मध्ये संतुलनस्य अभाव एव अवसादस्य अवस्था भवति। तात्पर्यमिस्ति यदा मानवसमक्षेकापि समस्या वा परिस्थिति आगच्छति तदासःचिन्तयतियत्समस्या वा परिस्थिति तस्य नियंत्रणे नास्ति अर्थात तस्याः समस्याः नियंत्रण तस्याःसमस्यायाःनियंत्रणेतस्यसामर्थ्यं नास्ति। निर्बलः एवअसमर्थः भवति तदा सःमानवःअवसादग्रस्तः भवति । अतः वयम्वक्तुम्शक्नुमः, यत मानव शरीरमेव मनसःसमक्षे काले-काले आगता समस्या यस्य निराकरणायसः स्वयं असहायमेवं असमर्थः भवति । तेन अवसादस्योत्पत्तिः भवति ।

परिभषा झअवसादस्य तात्पर्यमस्ति यत् शरीरद्वारावश्यकतानुसारं कृताविशिष्टानुक्रियातो भवति ।

अवसादस्य प्रकारः अवसादस्य मुख्यतः द्वौ भेदौ स्तः ।
1 सकारात्मको अवसादः
2 नकारात्मको अवसादः

सकारात्मको अवसादः अस्य अवसादस्य स्थितौ मानवो अवसाद जनक घटनातः चिन्तितः न भवति । अपितु साधनेन तस्य निराकरणं करोति ।एवं तं परिस्थितिमेका समस्यारूपे गृहणाति येन अवसादकालस्यापि सदुपयोगः कर्तुं शक्नोति। तस्य चिन्तनं सकारात्मकं भवति। एवं स अधिको जागरूको भवति । एवं स्वस्य सामर्थ्येन समस्यायाः निराकरणं करोति एवं प्रकारेण सकारात्मकमवसादस्य स्थितौ व्यक्तिः कार्यसम्पादनाय सामान्यादधिकः सक्रियः भवति।

नकारात्मकमवसादः अस्मिन्नवसादे मानवस्य दृष्टिकोणं नकारात्मकं भवति । एवमनेन कारणेन स अवसाद (तनाव) जनकपरिस्तित्या समाधाने स्वयमसमर्थ एवासाहायो भवति । येन तस्मिन् दुश्चिन्ताया उत्पत्तिः भवति ।

लक्षणम् झसर्वे जानन्ति एवावसादकाले मनुषये दैहिकमेवं मानसिकोभयोःप्रकारेण विघटनं भवति । अर्थात न केवलं शरीरमपितु मनो अपि कुप्रभावितं भवति । अवसादस्य लक्षणानां विवेचनमस्यान्तरगतं कर्तुं शक्यते ।

शारीरिकं लक्षणम्
मानसिकं लक्षणम्

योगसाधनः अवसादसमस्या कारणेन साम्प्रतं प्रत्येकजनःचकितः दुःखितः चास्ति । अस्य समाधानाय प्रयासरतो अस्ति । आधुनिक एलोपैथिक चिकित्सा पार्श्वे अवसाद दुरि कर्तुंकोअपिचीरसमाधानं नास्ति किन्तु यौगिकजीवनशैल्यांकेचित् विधयः सन्ति । यं स्वस्य जीवने आचरितुं प्रयासः कुर्यात् तर्हि अवसादस्य नियंत्रणं कर्तुं शक्यते । केचित् प्रमुखयौगिकोपायाः निम्नाः सन्ति-

- स्वस्य परमसत्ता परमात्मनोअभिन्नत्वमवसाद दुरि कर्तुं सर्वाधि कोपयोगी सर्व सरलोपायो अस्ति । सो विश्वसति यत् सः सर्वसमर्थः परमात्मा प्रतिपलमस्माकमुपर्युनुग्रहं करोति ।तस्य दृष्टिः सर्वदास्माकमुपरि तिष्ठति । अस्माभिः सार्धं.यत् किमपि भवति तद् भगवतः संरक्षणे एव भवति । तेन कृपया कदाप्यस्माकमनिष्टः न भविष्यति ।

- समयस्य मर्यादा पालनं झएवं प्रकारेण समयस्य महत्वं विज्ञाय वयं यस्मिन् काले यत् कार्यं.कूर्मः तं कार्यं समयेन पूरणीयमिति स्वभावः भवेत् । तर्ह्यपि अवसादस्य नियंत्रणं कर्तुं शक्यते ।

- सकारात्मकदृष्टिकोणः अवसाद्दुरि कर्तुमस्माभिः कामपि घटनां सकारात्मकरूपेण ग्रहितव्या । यतोहि कार्यं वा घटना ईश्वरद्वारा. भवति। किन्तु अस्माभिः स्वस्य कर्तव्यस्य निर्वाहः समुचित समयेन कर्तव्यम् ।

भविष्यस्य चिन्तनं करणीयम् प्रायः भविष्यस्यव्यर्थचिन्ताकारणेनापि मानवः तनावग्रस्तः भवति । अतैव भविष्यस्य चिन्तांत्यक्त्वा वर्तमाने जीवनस्य महत्वमंगी करोतु ।

-प्रर्थना अवसादात् मुक्त्याः प्रार्थनापि एकाप्रभावि साधनोअस्ति । सुखं भवतु वा दुःखं सर्वस्थितौ परमात्मनो ध्यानं कर्तव्यम् ।

-षट्कर्म जलनेति योगस्य शुद्धिक्रियासु अवसादमुक्तः भवितुं जलनेति क्रियापि बहुप्रभावी भवति । अनेन मस्तिष्कस्य (न्यूरोन्स) इत्यस्मिन् सम्यकप्रकारेण नेटवर्किंग भवति । एवं तमोगुणकारी विजातीय द्रव्याणि बहिः निःसरन्ति ।

त्राटकः झत्राटकक्रिया द्वारा नकारात्मकचिन्तनस्य सम्पतिः भवति। मानसिकसनतुलनं सुष्ठुः भवति ।

कपालभातिः झअस्य नियमिताभ्यासेन मनसः दुर्भावना बहिः निस्सरन्ति । एवं व्यक्तिः अवसादमुक्तो भवति ।

-आसनम् झआसनस्य नियमिताभ्यासेन शरीरस्य स्थिरतायाः. वृद्धिः भवति । अनेन शनैः-शनैः मनोअपि शान्तिं प्राप्नोति ।

-प्राणायामः प्राणायामः प्राणस्य नियंत्रणं कर्तुमेका विद्या वर्तते। अनेन प्राणः तु स्थिरः भवत्येव सहैव ब्राह्मण्डीयोर्जाया: सम्पर्केण तस्मिन् प्राणस्य मात्रायाः वृद्धिः भवति ।परिणामस्वरूप नकारात्मकोर्जायाः निष्कासनं भवति। तथा च व्यक्तिः स्वंप्राणवान्नेवं स्फूर्तिवाननुभवः करोति।

-धारणायाः अभ्यासः कस्याप्येकस्थादर्शलक्ष्ये स्वस्य ध्यानस्थिरिकरणेनापि जनो अवसादमुक्तो भवति।

-प्रातःकालीन भ्रमणम् झप्रातःकालीन वातावरणे सकारात्मक ऊर्जा भवति । अतैव अवसादमुक्तेः कृते नियमितरूपेण सूर्योदयात् प्राग्भ्रमणस्य स्वभावो भवेत् ।

-आत्मबोधस्य-तत्वबोधस्य साधना झअवसादमुक्तो भवितुं प्रातःकाले आत्मबोधस्य साधना तथा च रत्रीशयनकाले तत्वबोधस्य साधना कर्तव्या।

सत्य/ असत्य

अवसाद एका बहुआयामी प्रक्रिया अस्ति ।
अवसाद एका अनुक्रिया अस्ति ।
अवसादः केवलं व्यक्तेः शारीरिकं कार्याणां विघटनं करोति ।
-अवसादे मानवः परिस्थितिं नियन्त्रयितुं सफलं न भवति ।

एवं प्रकारेण स्पष्टं भवति यदवसादः किमस्ति। केन प्रकारेणास्योपरि नियंत्रणं कर्तुं शक्यते। मानव-जीवने यदि सकारात्मको अवसादः भवति तदा व्यक्तिः सक्रियः तथा जागरूको भवति। किन्तु यदावसादो अत्यधिको भवति एवं मानवसामर्थ्यात् बहिः भवति। तदा व्यक्तिः मानसिकरोगी भवति । अतो अवसादस्य प्रबंध नमत्यावश्यकं भवति। एवं अस्मिन् यौगिक-जीवनशैल्याः महत्वज्ञानमत्यन्त सहायकः सिद्धोभवितुं शक्यते।

## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सुजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्णं कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमम्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

# कृष्णस्य बाललीलाः

- डॉ.बलदेवानन्द-सागरः
Cell- 9810 5622 77
email- baldevanand.sagar@gmail.com

भारते यदुवंशः प्रमुखेषु राजवंशेषु अन्यतमः आसीत् । अस्य वंशस्य अनुवर्तिनो यादवाः गोपालकत्वेन विख्याताः जाताः। ते सुख्याते सुरम्ये प्रदेशे गोकुले निवसन्ति स्म। यादवानां प्रमुखः नन्द-गोपः तस्य पत्नी यशोदा च, आनन्द-सन्दोहं कृष्णं दत्तक-पुत्रत्वेन स्वीकृत्य तं गोकुलम् आनीतवन्तौ । गोकुलस्य अनेन नूतनेन संयोगेन यादवानां प्रसन्नता द्विगुणिता जाता।

कृष्णः गोकुल-वासिनां जीवनेषु अतुल्यं परिवर्तनम् अकरोत् । प्रेम्णा स्नेहेन च गोपाल-इति नाम्ना ख्यातः कृष्णः अतितरां चञ्चलः सर्वैः साकं लीलया व्यवहरति स्म। यद्यपि तस्य चञ्चल-बाल-लीलाभिः नैकवारं प्रतोदिताः सन्तोऽपि ते सर्वे गोपालाय स्निह्यन्ति स्म।

अनुमिनोतु , गोपालाय अधिकतमं किं रोचते स्म ? भवतु, दुग्धं नवनीतं च। प्रायेण प्रतिदिनमेव, यदा वत्सः निज-मातुः दुग्धं पातुम् उपक्रमते स्म , तद्-दृश्यं रमणीयं भवति स्म।

दुग्ध-पानानन्तरं कृष्णः गोवृन्दस्य पश्च-भागे निलीयते स्म। यदा यादव-स्त्रियः गो-दुग्धाहरणार्थम् आयान्ति स्म, कृष्णः गोः पुच्छं सहसा आकर्षयति स्म।

भवता किं कदाचित् एवं श्रुतं यत् कश्चन गोः पुच्छम् आकर्षयति चेत् तदा किं गौः स्थिरा अभविष्यत् ? नैव... एषा स्यात् कूर्देत् ... दुग्ध-पात्रं च, आस्फा लयेत्...! एतत् सर्वं दृष्ट्वा कृष्णः प्रमुदितः सन् मुक्त-मनसा हसति दूरे च पलायते स्म।

एकदा कृष्णः अतितरां चाञ्चल्य-पूर्णां लीलाम् अकरोत्। सः निजगृहस्य दुग्ध-भण्डारण-कक्षं गतवान्, यत्र दुग्धं मृत्तिका-पात्रे बालैः अप्राप्ये उन्नते स्थाने आधीयते स्म। किं जानाति भवान् कृष्णेन किम् आचरितम् ? सः पार्श्व-स्थात् कक्षात् चूर्णिका-प्रस्तरमेकम् लोठयित्वा तत्रानीय तस्योपरि च स्थितवान्।

अहो काठिन्यम्...! साम्प्रतमपि सः दुग्ध-पात्रं स्प्रष्टुं नैव अपारयत्। सः कानिचित् काष्ठानि प्रकीर्ण-फलकानि च समेत्य मिथः संयोज्य प्रस्तर-खण्डोपरि स्थापितवान्। तदुपरि महता प्रयासेन पादाङ्गुलिभिः आधृतः सन् दुग्ध-पात्रं बलात् स्प्रष्टुम् अपारयत्।

सहसा काष्ठानि प्रकीर्ण-फलकानि च अवपतितुम् आरभन्त। कृष्णः पात्र-रज्जुं धृत्वा 'अम्ब ! अम्ब !! कृपया आगच्छतु ... !!! साहाय्यं करोतु... अम्ब...!' इति सोत्कण्ठं मातरम् आकारयत्।

तस्मिन् स्थले सर्व-प्रथमं कृष्णस्य भ्राता, बलरामः प्राप्तः, नभसि दोलायमानं कृष्णं दृष्ट्वा बलरामः सानन्दं मातरम् आकारयत् , ।मात ! सपदि आगच्छ ! कृष्णः नभसि दोलायते .... हा... हा... हा...!'

एतत्-संक्षोभं श्रुत्वा यशोदा, राधया तत्-सखीभिः च साकं धावन्ती तत्र आगता । राधा कृष्णस्य सखी आसीत् । कृष्णं दृष्ट्वा यशोदा साश्चर्यं अवदत् - 'उद्धत ! बाल ! , अहं दुःखितास्मि त्वत्तः... !'

कृष्णः यदा अधः अपश्यत् , सः राधां तस्याः अन्यसखीः च अपश्यत, तदा सः समधिकेन तार-स्वरेण अवदत् - 'अम्ब ! कृपया ... अम्ब !! कृपया ... साहाय्यं करोतु...अम्ब...! मां नीचैः अवतारयतु ...!!'

इदं श्रुत्वा कृष्णे कृतदया यशोदा तम् अवातारयत्। परञ्च, कृष्णः साम्प्रतमपि हताशः आसीत् , अतः यशोदा किम् अकरोत् ? अस्तु ... किञ्चित् नवनीत-पिण्डं दत्वा तं प्रसादितवती।

एकदा , कृष्णस्य अन्यतमः सखा बलरामम् उपगम्य अवदत् , 'राम ! पश्यतु , कृष्णः मृत्तिकां खादति !' अयं कृष्णस्य ताडनं वाञ्छति स्म' निश्चयेन, मृत्तिकां खादन्तं कृष्णं यदि यशोदा पश्यति चेत् नूनं सा तं ताडयेत् ! इदमेव असौ सखा ईच्छति स्म।

बलरामः विनैव काल-यापनम् , धावन् एव यशोदाम् उपगम्य तां वार्ताम् इमाम् अश्रावयत्' रुष्टा यशोदा बलरामेण साकं कृष्णम् अन्वेष्टुं निर्गता' तैः दूरं नैव गमनीयम् आसीत्। सः तत्रैव आसीत् ! तम् उपगम्य यशोदा अपृच्छत् , कृष्ण ! कथय मां, किं त्वया मृत् भक्षिता ?' नैव मात...! नैव भक्षिता।' कृष्णः अवदत्।

यद्यपि यशोदा तं पुनः पुनः पृष्टवती, कृष्णः तुल्यमेव उत्तरं प्रादात्। परञ्च, यशोदा तस्मिन् विश्वासं नैव कृतवती ! कृष्णस्य हस्तौ दृढं तस्य पृष्ठभागे बद्ध्वा अपृच्छत् , 'कृष्ण ! मुधा मा वद ! यदि त्वम् अलीकं वदिष्यति, ताडयिष्यामि। मुखम् उद्घाटय। तव मुखान्तं निरीक्षे ' कृष्णः सस्मितं निज-मुखम् उदघाटयत् । यशोदा अतितराम् आघाताहता जाता । मुखाभ्यन्तरं तया यद् अवलोकितम्, सा नासीत् मृत्तिका, परञ्च वसुधा, सूर्यः, चन्द्रमा, नक्षत्राणि..., किम्बहुना, समग्रं जगत्।

इदं सर्वं दृष्ट्वा किञ्चित् स्थिरताम् अवाप्तुकामा यशोदा कृष्णस्य मुखे गोकुलम् अवालोकयत्। अपि च, कृष्णस्य अनावृत-मुखस्य सम्मुखं स्थिताम् आत्मानमपि विलोकितवती। परम-दुःखिता यशोदा कृष्णं सोत्कण्ठम् आश्लिष्य प्रार्थितवती। कृष्ण ! कृपया निजमुखं पिधातु ... अनावृतम् इदं स्वीयं मुखं पिधातु कृपया...! सस्मैरं कृष्णः स्वकं मुखं पिहितवान् ।

एकदा यदा यशोदा दधि-मन्थनं करोति स्म, तदा कृष्णः कक्षाभ्यन्तरम् आगतः। 'प्रिय-वत्स ! किं नवनीतं वाञ्छसि ... ?' यशोदा अपृच्छत्। कृष्णेन मूर्धावधूननं कृत्वा न्यक्कृतम्। कृष्णः स्व-मातुः दुग्धं पातुम् इच्छति स्म। ततः परम् , यशोदा तं दुग्धं पाययितुम् आरभत। किञ्चित् कालानन्तरमेव यशोदा ज्ञातवती यत् चुल्लिकोपरि प्रक्कथनार्थं स्थापितं दुग्धं पात्राद् बहिः निस्सरति। सा सहसा उत्थाय कृष्णं दूरे अपसारितवती। भवान् कल्पयितुं शक्नोति यत् कृष्णः कियान् रुष्टः सञ्जातः ? क्रोधाविष्टः सः तत्रस्थं सर्वमपि नवनीतं रंहसा खादितवान्। इतोऽपि अधिकतर-रुष्टः कृष्णः पार्श्वस्थं क्षीर-पात्रं विकीर्य मार्जारं क्षीर-पानार्थम् अनुज्ञातवान्। ततः परमसौ गृहात् तूर्णं निःसृतः।

परावर्तितवती यशोदा अवालोकयत् यत् विकीर्णं दुग्धं मार्जारः अवलिहति स्म, नवनीतं किञ्चिदपि अवशिष्टं नासीत्। यशोदा वस्तुतः क्रुद्धा अजायत, 'गोपालेन अतितरां तोदितास्स्मि, नूनमसौ सम्यक्तया ताडनीयोस्स्ति। ततः परमेव सः सुशिष्टो भविता'- सा विचारितवती। यशोदा गृहात् बहिः निर्गता। पूर्वतोऽपि भयङ्करं दृश्यम् अपश्यत्। सा अपश्यत् यत् कृष्णः अवशिष्टं नवनीतं कपिभ्यः खादयति स्म। यशोदा क्रोधाग्निना ज्वलिता। यशोदा रज्जुना कृष्णं बद्ध्वा रज्जोः अपरान्तं उलूखलेन सार्धम् अबद्धनात्! 'उत्पातकारिन् बाल ! अधुना त्वं किं कर्तुं प्रभवसि - इति ज्ञास्यामि ! किञ्चित् कालार्थं अत्रैव तिष्ठ !!'

प्रमुदितः बलरामः तन्मित्राणि च तत्र आगतानि। ते कृष्णं उपाहसन् ततः परं क्रीडितुं निर्गताः। वराकः कृष्णः ! सः अतितराम् एकाकी अवर्तत !!

किञ्चित् कालानन्तरं कृष्णः सत्यं हि अतिरुचिम् अभजत। किं भवान् जानाति यत् तेन किं कृतम् ? सः पश्चवर्तिनम् उलूखलम् आकर्षयन् चलितुम् आरभत। ततः प्रचलन् कृष्णः पार्श्वस्थं वृक्ष-द्वयम् अपश्यत्। किं भवान् इदं ज्ञातुं नितरां उत्सुकः नास्ति यत् ततः परं कृष्णेन किम् आचरितम् ? सः केवलं वृक्ष-द्वयस्य मध्यात् प्राचलत् ! अपिच, उलूखलः तयोः मध्ये अवरुद्धः। कृष्णः मन्थरतया उलूखलम् आकर्षयत्। आह...! ओह् ...!! उलूखलः साम्प्रतमपि अवरुद्धः एव आसीत्। कृष्णः स्व-पूर्ण-शक्त्या उलूखलम् आकर्षयत्। अपि च, ततः परं किं घटितम् ? वृक्षद्वयमपि उन्मूलितं जातम् ! अनुवर्तिनि क्षणे उन्मूलित-वृक्ष-द्वयात् देवौ समुत्पन्नौ। एतौ देवौ वृक्ष-योनौ समुत्पन्नार्थं शापितौ आस्ताम्। कृष्णः स्व-लीलया एव तौ शापमुक्तौ व्यदधात्। कृष्णाय निज-कृतज्ञतां समर्प्य तौ स्वर्गं परावर्तितौ। वृक्षयोः उन्मूलनस्य महारावं श्रुत्वा गोकुलस्य प्रत्येकमपि निवासी धावन्निव तत्रागतः। कृष्णः प्रहसन्निव तत्र स्थितः आसीत् ! नन्दगोपः कृष्णम् उन्मोचितवान्।

किम् अद्भुतं घटितम् ? द्वौ विशालौ वृक्षौ अप्रतिहतौ, सहसा उन्मूलितौ जातौ । 'इदन्तु कस्यचित् अभिशापस्य उत्पात-जातम् । 'अनेके यादवाः विचारितवन्तः। 'अस्मात् आत्मानं रक्षितुम्, अस्माभिः किं करणीयम् ? स्थानमेतत् परित्यजेम ?' एवं हि, यादवाः गोकुलं परित्यज्य वृन्दावनं प्रति याताः।

दिनानि व्यतीतानि। कृष्णः बलरामः च पशु-पालन-योग्यौ सञ्जातौ। तौ अपि अन्यैः गोपालकैः सह गोचारणार्थं प्रयातुम् आरभताम्। तयोः अम्बा मध्याह्न-भोजनार्थं प्रतिदिनं ताभ्यां दधि-मिश्रितम् ओदनं ददाति स्म। ते गोपालाः आदिनं पशुभिः सार्धं परितः परिभ्रमन्ति स्म।

यदा गावः गोचारण-भूमौ चरन्ति स्म, कृष्णः तस्य सखायः च क्रीडन्ति स्म, उत वा, वृक्षाणां छायासु विश्रमन्ते स्म। कृष्णः तदा स्वीयं वेणुं वादयति स्म। कृष्णस्य वेणु-स्वरं श्रुत्वा प्रत्येकमपि प्राणी परिवेश-जातं विस्मरन्ति स्म। एतादृशं मधुरं सङ्गीतम् ! गावः ग्रास-चरणं विस्मृत्य सङ्गीत-माधुर्ये निमग्नाः अभूवन्। पक्षिणः सङ्गीतमेतत् श्रोतुम् उड्डीय कृष्णं निकषा आयान्ति स्म। मयूराः हरिणः च आनन्द-सन्दोह-भरिताः तं परितः नृत्यन्ति स्म।

एकदा, किञ्चित् अतितरां अद्भुतं घटितम्। कृष्णस्य केचन सखायः गावः च विलुप्ताः जाताः ! एते कृष्णस्य वेणुगानं श्रोतुं तस्य समीपम् उपयान्ति स्म। ते सर्वेऽपि कुत्र प्रयाताः ? निज-वंशीं वादयन् कृष्णः विलुप्तानि मित्राणि गाः च अन्वेष्टुम् आरभत।

सुदीर्घ-कालं यावत् अन्वेषणानन्तरमपि सः न कमपि प्राप्तवान्। तदा कृष्णः अन्वभवत् यत् ब्रह्मदेवः प्रवञ्चनया एवं क्रीडति ! ब्रह्मा, येन समग्रमपि ब्रह्माण्डं सृष्टम्। सः कृष्णं परीक्षितुं गोपालान् गाः च गोपायितवान्। किं भवान् जानाति ? तदा कृष्णेन किम् आचरितम् ?

निज-विलुप्तानां मित्राणां गवां च स्थाने सः तेषां तासां च प्रतिकृतीः विरचितवान्। सायङ्काले कृष्णः प्रतिदिनमिव निज-मित्रैः गोभिः च साकं गृहं प्रतिनिवृत्तः। ब्रह्मदेवः असमञ्जसताम् अन्वभवत्। कृष्णं परीक्षितुं गोपायितानां गवां गोपालानां च विषये अधुना मया की करणीयम् ?'

दिनानि व्यतीतानि। अन्ततः, ब्रह्मदेवः कृष्णस्य समक्षम् उपस्थाय न्यवेदयत् , 'कृपया मां क्षम्यताम्। केवलं भवन्तं परीक्षितुं वाञ्छामि स्म। अत एव मया गोपालाः गावः च चोरिताः गोपायिताः च। एवम् इदम् आचरितम् ! अहं जानामि-भवान् साक्षात् पुरुषोत्तमस्य नारायण-विष्णोः अवतारः।'

सस्मितः कृष्णः ब्रह्मदेवं न्यगादीत् -'भगवन् ! भवता मम मित्राणि पशवः च गोपायिताः, परं मया तु सायम् एते साकमेव गृहं नेतव्याः आसन् । अत एव, मया एते पुनः सृष्टाः सन्ति।'

एतत् श्रुत्वा, ब्रह्मदेवः अभिघोषितवान्- 'अहं स्वीयं पराजयं स्वीकरोमि। गोपायिताः सर्वाः गावः गोपालाश्च मया प्रत्यानीताः। परञ्च विशङ्के यत् भवता प्रकल्पितानां गवां गोपालानां च किं भविष्यति इति ?'

कृष्णः सस्मितं अङ्गुलिं निर्दिशन् न्यगादीत्-'पश्यतु !' ततः परं ब्रह्मदेवेन किं दृष्टम् ? कृष्णेन प्रकल्पिताः सर्वाः अपि गावः यादवाश्च स्वयं भगवतो विष्णोः स्वरूपतां परिणताः। प्रत्येकमपि विष्णोः नाभितः कमलं प्रादुरभूत्। प्रत्येकमपि कमले ब्रह्मदेवस्य प्रतिमूर्तिः उपविष्टा आसीत्। आश्चर्यचकितः ब्रह्मदेवः एतत् सर्वं संवीक्षते स्म। ततः परं सः बद्ध-कराञ्जलिः कृष्णाय प्रणिपातं व्यदधात् । अनुवर्तिनि क्षणे, विष्णोः सर्वाण्यपि प्रतिरूपाणि एकस्मिन् समन्वितानि सन्ति कृष्णे विलीनानि। कृष्णाय आदराञ्जलीन् अर्पयित्वा ब्रह्मदेवः प्रतिनिवर्तितः। भगवतः विष्णोः अवतारः, भगवान् कृष्णः स्मितं व्यदधात्। परःसहस्त्रं सूर्य-प्रभाभिः प्रकाशितः अवर्तत।

कृष्णः न कमपि किञ्चिदपि अवदत् यत् किं किं घटितम् इति। वृन्दावने सर्वं यथावत् सञ्जातम्, तथा च, कृष्णः सर्वैः निज-मित्रैः सह सुखम् आनन्दम् च अनुभवन् व्यराजत।



# हनुमान-चालीसाः

हृद्दर्पणं नीरजपादयोश्च गुरोः पवित्रं रजसेति कृत्वा ।
फलप्रदायी यदयं च सर्वं रामस्य पूतञ्च यशो वदामि ।।

स्मरामि तुभ्यं पवनस्य पुत्रं बलेन रिक्तो मतिहीनदासः।
करोतु दूरं सकलञ्च दुःखं विद्यां बलं बुद्धिमपि प्रयच्छ ।।

जयतु हनुमद्देवो
ज्ञानाब्धिश्च गुणाकरः।
जयतु वानरेशश्च
त्रिषु लोकेषु कीर्तिमान् ।।(1)

दूतः कोशलराजस्य
शक्तिमांश्च न तत्समः।
अञ्जना जननी यस्य
देवो वायुः पिता स्वयम्।।(2)

हे वज्रांग महावीर
त्वमेव च सुविक्रमः।
कुत्सितबुद्धिशत्रुस्त्वम्
सुबुद्धेः प्रतिपालकः।।(3)

काञ्चनवर्णसंयुक्तो
वासांसि शोभनानि च।
कर्णयोः कुण्डले शुभ्रे
कुञ्चितानि कचानि च।।(4)

वज्रहस्ती महावीरः
ध्वजायुक्तस्तथैव च ।
स्कन्धे च शोभते यस्य
मुञ्जोपवीतशोभनम् ।।(5)

नेत्रत्रयस्य पुत्रस्त्वं
केशरीनन्दनो खलु।
तेजस्वी त्वं यशस्ते च
वन्द्यते पृथिवीतले।।(6)

विद्यावांश्च गुणागारः
कुशलोऽपि कपीश्वरः।
रामस्य कार्यसिद्ध्यर्थ
मुत्सुको सर्वदैव च।।(7)

राघवेन्द्रचरित्रस्य
रसज्ञो स प्रतापवान् ।
वसन्ति हृदये तस्य
सीता रामश्च लक्ष्मणः।।(8)

वैदेहीसम्मुखे तेन
प्रदर्शितस्तनुः लघुः।
लङ्का दग्धा कपीशेन
विकटरूपधारिणा।।(9)

हताः रूपेण भीमेन
सकलाः रजनकचराः।
कार्याणि कोशलेन्द्रस्य
सफलीकृतवान् प्रभुः।।(10)

जीवितो लक्ष्मणस्तेन
खल्वानीयौषधम् तथा ।
रामेण हर्षितो भूत्वा
वेष्टितो हृदयेन सः।।(11)

प्राशंसत् मनसा रामः
कपीशं बलपुङ्गवम्।
प्रियं समं मदर्थं त्वं
कैकेयीनन्दनेन च ।।(12)

यशो मुखैः सहस्रैश्च
गीयते तव वानर ।
हनुमन्तं परिष्वज्य
प्रोक्तवान् रघुनन्दनः।।(13)

सनकादिसमाः सर्वे
देवा ब्रह्मादयोऽपि च।
भारतीसहितो शेषो
देवर्षिः नारदः खलु।।(14)

कुबेरो यमराजश्च
दिक्पालाः सकलाः स्वयम्।
पण्डिताः कवयो सर्वे
शक्ता न कीर्तिमण्डने।।(15)

उपकृतश्च सुग्रीवो
वायुपुत्रेण धीमता।
वानराणामधीपोऽभूद्
रामस्य कृपया हि सः।।(16)

तवैव चोपदेशेन
दशवक्त्रसहोदरः।
प्राप्नोतीति नृपत्वं स
जानाति सकलं जगत् ।।(17)

योजनानां सहस्राणि
दूरे भुवः स्थितो रविः।
सुमधुरं फलं मत्वा
निगीर्णः भवता ननु।।(18)

मुद्रिकां कोशलेन्द्रस्य
मुखे जग्राह वानरः।
गतवानब्धिपारं स
नैतद् विस्मयकारकम्।।(19)

यानि कानि च विश्वस्य
कार्याणि दुष्कराणि हि ।
भवद्कृपाप्रसादेन
सुकराणि पुनः खलु ।।(20)

द्वारे च कोशलेशस्य
रक्षको वायुनन्दनः।
तवानुज्ञां विना कोऽपि
न प्रवेशितुमर्हति।।(21)

लभन्ते शरणं प्राप्ताः
सर्वाण्येव सुखानि च ।
भवति रक्षके लोके
भयं मनाग् न जायते ।।(22)

समर्थो न च संसारे
वेगं रोद्धुं बली खलु।
कम्पन्ते च त्रयो लोकाः
गर्जनेन तव प्रभो।।(23)

श्रुत्वा नाम महावीरं
वायुपुत्रस्य धीमतः।
भूतादयः पिशाचाश्च
पलायन्ते हि दूरतः।।(24)

हनुमन्तं कपीशञ्च
ध्यायन्ति सततं हि ये।
नश्यन्ति व्याधयः तेषां
रोगा दूरीभवन्ति च।।(25)

मनसा कर्मणा वाचा
ध्यायन्ति हि ये जनाः।
दुःखानि च प्रणश्यन्ति
हनुमन्तं पुनः पुनः।।(26)

नृपाणाञ्च नृपः रामः
तपस्वी रघुनन्दनः।
तेषामपि च कार्याणि
सिद्धानि भवता खलु ।।(27)

कामान्यन्यानि सर्वाणि
कश्चिदपि करोति च ।
प्राप्नोति फलमिष्टं स
जीवने नात्र संशयः।।(28)

कृतादिषु च सर्वेषु
युगेषु स प्रतापवान् ।
यशः कीर्तिश्च सर्वत्र
देदीप्यते महीतले ।।(29)

साधूनां खलु सन्तानां
रक्षयिता कपीश्वरः।
राक्षसकुलसंहर्ता
रामस्य प्रिय वानर ।।(30)

सिद्धिदो निधिदस्त्वञ्च
जनकनन्दिनी स्वयम् ।
दत्तवती वरं तुभ्यं
जननी विश्वरूपिणी ।।(31)

कराग्रे वायुपुत्रस्य
चौषधिः रामरूपिणी।
रामस्य कोशलेशस्य
पादारविन्दवन्दनात्।।(32)

पूजया मारुतपुत्रस्य
नरः प्राप्नोति राघवम् ।
जन्मनां कोटिसंख्यानां
दूरीभवन्ति पातकाः।।(33)

देहान्ते च पुरं रामं
भक्ता हनुमतो सदा।
प्राप्य जन्मनि सर्वे
हरिभक्ताः पुनः पुनः।।(34)

देवानामपि सर्वेषां
संस्मरणं वृथा खलु।
कपिश्रेष्ठस्य सेवा हि
प्रददाति सुखं परम्।।(35)

करोति संकटं दूरं
संकटमोचनो कपिः।
नाशयति च दुःखानि
केवलं स्मरणं कपेः।।(36)

जयतु वानरेशश्च
जयतु हनुमत्प्रभुः।
गुरुदेवकृपातुल्यं
करोतु मम मङ्गलम्।।(37)

श्रद्धया येन केनापि
शतवारञ्च पठ्यते।
मुच्यते बन्धनाच्छीघ्रम्
प्राप्नोति परमं सुखम् ।।(38)

स्तोत्रं तु रामदूतस्य
चत्वारिंशच्च संख्यकम् ।
पठित्वा सिद्धिमाप्नोति
साक्षी कामरिपुः स्वयम् ।।(39)

सर्वदा रघुनाथस्य
तुलसी सेवकः परम्।
विज्ञायेति कपिश्रेष्ठ
वासं मे हृदये कुरु।।(40)

विघ्नोपनाशी पवनस्य पुत्रः कल्याणकारी हृदये कपीशः।
सौमित्रिणा राघवसीतया च सार्धं निवासं कुरु रामदूत ।।

देवदत्तो गुरुर्यस्य मार्कण्डेयश्च गोत्रकम्।
अनुवादः कृतस्तेन कृपया पितृपादयोः।।

-मार्कण्डेयो रवीन्द्रः

## शीतम्

—प्रेमशङ्करशर्मा

कालेऽस्मिन् खलु संसारे,व्याप्नोति सर्वतः शीतम्।।
कम्पन्ते जीव-जन्तवो, पृथिवीकायं भयभीतम्। ।।१।।

स्यादमेरिका रूसो वा, जर्मनीटली-जापानाः,
हालैण्डस् स्यात्फ्रासो वा,देशास्तु हिमेन समानाः,
अस्त-व्यस्तं तु जीवनं, सर्वथा मनोविपरीतम् ।।२।।

पर्वतशृङ्गाः शुचिशुभ्रा, इव ते नवनीतस्नाताः,
आकाशात्तथा पतन्ति,श्वेताङ्गाः हिमप्रपाताः,
वाञ्छतीव कश्चित् कर्तुं, स्वक्रोडे जगद् विनीतम् ।।३।।

सर्वत्र यथा हिमराजः, शक्त्या सह भुवं प्रशास्ति,
दृश्यते रवेर्दुर्बलता,विजयिनी हिमालयताऽस्ति,
जाने न भगवता तेजः, सूर्येण कुत्र विक्रीतम् ।।४।।

बालानां गृहहीनानां, वर्धते जनानां पीडा,
कम्बले गृहे पर्यङ्के,रोचते युवभ्यः क्रीडा,
ग्रामेषु वाद्यते बालैर्दद्भिः प्रातःसङ्गीतम् ।।५।।

शस्यार्थ श्रमं कुर्वते,कृषकास्ते रात्रौ क्षेत्रे,
वस्त्राणि न धत्ते कायं,निद्रां न दधाते नेत्रे,
तेषां कष्टं तु विधातः!हा!पश्य वर्णनातीतम् ।।६।।

## भारतीयत्वम्

**डॉ. वेदव्रत आलोकः**

आर्यावर्तः पुराकाले वेद-विद्यां समाश्रितः।
शान्ताः प्रेम-युताः सर्वे, सम्पन्ना धन-वैभवैः।।1।।

नृपाणामुत्तमो राष्ट्रे, दौष्यन्तिर्भरतोऽभवत्।
तस्य वंशाभिधानाद् वै, प्रसिद्धो भारतो भुवि।।2।।

'भा-रत' इति शब्दार्थे, निहितां दिव्य-भावनाम्।
मत्वा त्वार्याः प्रसन्नास्ते, भा-युते ब्रह्मणि स्थिताः।।3।।

वैदिकैरार्य-देशीयैः स्वीकृतं नाम 'भारतम्'।?
'भा-रतं' भारतं तेषाम्, 'भारतीया' अतो वयम्।।4।।

प्रविष्टैः केचनाऽऽक्रूरैः, विजित्वा शान्त-भारतम्।
दण्ड-भेदेन शासद्भिः, विनष्टा धर्म-संस्कृतिः।।5।।

सिन्धु-देशादिहस्थान्नो, 'हिन्दुस्थानी' प्रचार्य ते।
'हिन्दवी', 'हिन्दु' चावोचन्, 'इंडिया' तस्य विकृतिः।।6।।

साम-दानेन पन्थान्धैः, भा-रता विवशीकृताः।
'मुस्लिमा', 'क्रिश्चिना' कृत्वा, त्रोटिता 'भारतीयता'।।7।।

वैदिक-ज्ञान-सम्प्राप्ते, प्रकाशे प्रभु-प्रेरिते।
भा-रता 'भारता' भूर्यु, 'भारतीयत्व'-गौरवात् ।।8।।

स्वदेशे वा विदेशे वा, दौर्मनस्यं विमोचितुम्।
प्रख्याप्यं 'भारतीयत्वम्', त्यक्त्वा मोहं पुराणकम् ।।9।।

## संवर्धय स्वनादम्

**- डा. संजयकुमारचौबे**

हृदये करोषि बन्धो! कथमद्य रे! विषादम्
श्रुत्वापि जीवनेऽस्मिन् मञ्जीरमञ्जुनादम्।

तव रम्यरत्ननिलये सौख्यप्रफुल्लपुष्पम्
पुनरप्यहो न सहते ते हृत् परप्रसादम्।

दिष्ट्या बिलेशयैस्त्वं दष्टोऽपि जीवितोऽसि
अद्यापि चुम्बसि त्वं लोकोपकारपादम्।

विबुधोऽपि तिष्ठतीह ननु साक्षिपिञ्जरेऽस्मिन्
निजलाञ्छनं विनेतुं प्रददाति सोऽपि वादम्।

सर्वत्र सूचिकावन् मृदुलं वचो न सिद्धम्
स्वत्वस्य सिद्धयेऽतः संवर्धय स्वनादम्।

यो लक्ष्यबद्धदृष्टिर्धीरो विशुद्धचित्तः
कर्णे करोति नो स व्यर्थं जनप्रवादम्।

प्रभुतासनं न दत्ते नित्यं सुखं नरेभ्यः
पटुसादिनोऽपि मार्गे दधतीह किं न सादम्।

सुप्तोत्थिताभिलाषा ननु नृत्यतीव काचित्
संजय! हि पूरयेस्तां त्यक्त्वाखिलं प्रमादम्।

# आचार्यवासुदेवद्विवेदिशास्त्रिणां बालसाहित्यम्

**—डॉ अरविन्दकुमारतिवारी**

अयि विविधविद्यापारावारपारीणाः! सुमतयो विद्वांसः कवयः!

सुदिनमिदमस्माकमस्ति यद् बालसाहित्यसम्मेलने समुपस्थिता वयमानन्दमनुभवामः। धन्यवादार्हा आयोजकाः यैः विचारणीयविषये महता समुल्लासेन मह्यमवसरः प्रदत्तः। सुजनाः! अहमन्तेवासी तेषामाचार्यचरणानाम् आचार्यवासुदेवद्विवेदिशास्त्रिणामस्मि। तैः सुरभारतीसमाराधनतत्परैः बहूनि कार्याणि परोपकारार्थं कृतानि वर्तन्त इति भवत्सु को न विजानाति। अहन्तेषां वार्धक्ये चरणकमलचंचकरीको जातः। साक्षात् तेषां महनीयं पुण्यप्रदं दर्शनमधुनापि मां प्रोत्साहयति। तैरेतैः गुरुवरैः घर घर संस्कष्त का प्रचार हो इति समुद्घोषकैः हिन्द्यां संस्कृते संस्कृतभाषाप्रचारपराणि गानानि विरचितानि, सम्प्रत्यपि संस्कृतानुरागिणां चेतश्चोरयन्तीवेति नास्ति विस्मयः। महोदयैरेभिस्तु अनेकानि पुस्तकानि विलिख्य सुरभारतीप्रचारः कृतः। तेषां बालसाहित्यम् अत्यन्तमेव दर्शनीयमस्ति, अहमिममेव विषयमुपायनीकृत्य भवतां पुरतः समुपस्थितोऽस्मि। विज्ञाः! निर्मत्सराः! अस्माकं सुपरिचितेन कविना श्रीसम्पदानन्दमिश्रमहाभागेन समायोजिते 2017तमे वर्षे देशस्य राजधान्यां तत्र च सुविख्याते अरविन्दाश्रमे मयापि भागो गृहीत आसीत्। तत्र विदुषां व्याख्यानानि अतीव श्रुतिमधुराणि चाकर्णितानि। प्रथममेव विश्रुतकीर्तिना महाकविना अभिराजराजेन्द्रमिश्रेण गुरुणा बालसाहित्यविषये विस्तृतं व्याख्यानमकारि। अहं कृतज्ञोऽस्मि तान् प्रति। तैः स्वव्याख्याने प्रोक्तं यद् आधुनिककाले बहवः सुकवयो रचयितारो वा बालसाहित्यसंवर्धने संलग्ना दृश्यन्ते पुरस्कारलिप्सया यशोलिप्सया अमरवाणीप्रसारणधिया वेति। किन्तु आसीत् एकः काश्यां कविः विद्वान् येन निर्व्याजं संस्कष्तसेवकेन बालसाहित्यं रचितं, तस्य नाम आचार्यवासुदेवद्विवेदिशास्त्री वर्तते। अये! देववाणीपानपूतहष्दयाः! इदं वैशिष्ट्यं गौरवं महत्त्वं चेति अस्माकं गुरुवराणाम्। यदि महाकविर्वदति तदा अवश्यमेव आचार्यवासुदेवद्विवेदिवराणां सङ्क्षिप्तः परिचयः अविज्ञातानां विज्ञानाय विज्ञातानां पुनरावष्तये च श्राव्यते। तदनु तेषां दर्शनीयं बालसाहित्यं यथामति प्रकटीकरिष्यते।

आदौ परिचयः—

देववाण्या यदा देशे ग्लानिर्भवति भारते।
अभ्युत्थानमभाषाणां तदात्मानं सृजत्ययम्।
संस्कृतस्य विकासाय संस्कृतेः रक्षणाय च।
वासुदेवो गुरुर्धीमान् संस्कृतोद्धारमानसः।।

(अयि विबुधाः! बन्धवः! लोकेऽस्मिन् स्मरणीयः स्मर्यते, पूजनीयः पूज्यते वन्दनीयो वन्द्यते सहृदयैर्बुधैरिति विश्रुता रीतिः। तदहं गुरुवरं स्मरामि यत्स्मरणं पवित्रयिष्यति जीवनमिह संस्कृतसमुपासकानामिति प्रतिजाने।)

भारतवर्षस्योत्तरप्रदेशान्तर्गतदेवरियाजनपदस्य भवानीछापरग्रामे सप्तत्युत्तरैकोनविंशतिशततमे वैक्रमाब्दे फाल्गुनशुक्लैकादश्यां तिथौ रविवासरे खीष्टाब्दानुसारं चतुर्दशोत्तरैकोनविंशतिशततमेऽब्दे नवमे दिनांके महतो विदुषो यमुनाप्रसादद्विवेदिनो भार्या पवधारीदेवी पुत्ररत्नमजनयत्। यथा

देव्येषा पवधारिनामजननी या देवकीवोद्भुता
सप्तत्युत्तर ऊनविंशशतके संवत्सरे वैक्रमे।
नक्षत्रेऽदभुतपुष्यके धनुषि सा शुक्ले रवौ फाल्गुने
रात्रौ पुत्रमजीजनच्छुभतिथौ चैकादशीपर्वणि।।[1]

यो हि भारते वासुदेवद्विवेदिनाम्ना विख्यातिमलभत। बाल्यकाले मृदुलस्वभावोऽयं बहुषु स्थलेषु स्वपित्रा साकं पर्यटत्। अस्मिन्नेव काले पठितुं लेखितुं संस्कृते वक्तुं शक्तिरस्य समुद्भूता, ततश्चानेन व्युत्पन्नमतिना बहवः श्लोकाः कण्ठस्थीकृताः। विलक्षणस्वभावोऽयं संस्कृतं विज्ञातुमुद्विग्न इवासीत्। संस्कृतसंवर्धनार्थमवतीर्णः स्वर्गादयं पूर्वजन्मार्जितामरवाणीस्वरेण संस्कष्तश्लोकान् शीघ्रमेवान्वस्मरत्। विलक्षणमनीषासम्पन्नोऽयं यदा सुरभारतीपद्यानि श्रावयति स्म, तदा जनाः विमुग्धा भवन्ति स्म, बहवः संस्कृतप्रियास्तु विद्वांसः स्वगृहं प्रति एनं नयन्ति स्म संस्कृतं श्रोतुमिति चरणसेवनकाले वयं तेषामेव मुखारविन्दात् श्रुतमिदानीं स्मरामः। पंचदशे वर्षे संयोगवशादस्य गुरोः वासुदेवस्य रुक्मिण्या साकमिव रुक्मिण्या सार्द्धं विवाहः सम्पन्नस्ततश्च काशीं प्रत्यागमनमभूत्। परन्तु दुर्दैवादयं पितृपादेषु दिवंगतेषु मातुरनुरोधात् समीपतरवर्तिषु विद्यालयेृवेवाध्ययनमारब्धवान्, पितृव्यस्य मातुश्च संरक्षणे वर्धमानो वासुदेवद्विवेदी हिमालय इव दष्ढस्सन् स्वकर्मणि निरतो जातो न स्वप्नेऽपि सामान्यजन इव कर्मणः पथः पष्थग्गतः। असावध्ययनावधावेव कॉग्रेसचालिते विशाले आन्दोलनेऽध्ययनमपहाय सक्रियदेशभक्तस्सन् मातृभूमिं प्रति भक्तिं प्रकटीकृतवान्, तदनु धीमतानेन स्वगुरोः भगवत्प्रसादस्याज्ञया पुनरपि समारब्धमध्ययनम्, किन्तु संस्कृतप्रचारं कर्तुं यो निश्चयो वासुदेवद्विवेदिना विहितस्तस्मादध्ययने रुचिर्न जाता। अतोऽसौ वेदाचार्यपरीक्षामुत्तीर्य स्वकर्मक्षेत्रमङ्गीचकार। देशे स्वतन्त्रे जाते पंचदशदिनांके सप्तचत्वांरिशदुत्तरैकोनविंशतितमेऽब्दे गुरुणा सार्वभौमसंस्कृतप्रचारसंस्थानं संस्थापितं, यत्र जातिधर्मलिंगादिभेदशून्या अमरवाणीजिज्ञासवः संस्कृतसम्भाषणज्ञानमलभन्त अधुनापि लभन्ते चेति। आचार्यवासुदेवद्विवेदिमहोदयेन ग्रामाद् ग्रामं वनाद् वनं नगरान्नगरं प्रति संस्कृतप्रचाराय सोल्लासं गतम्, अद्यापि काव्यं गुरुवराणां सर्वैरपि अस्माभिः परिशीलनीयमस्ति, यत्र संस्कृतप्रचाराय कृतानां यात्राणां जीनवनानुभवानां च मनोहारि वर्णनमवाप्यते। गुरुवरो लिखति मनोभावं यत् 'अद्यापि' बिह्लणकष्ताया चौरपंचाशिकाया एकस्य लघुपदस्य मया अनुकरणं ग्रहणं वा कष्तं, परन्तु चौरपंचाशिकायाः प्रत्येकं पद्ये यत्सौन्दर्यं यच्च लाालित्यं लभ्यते तत्तु सर्वथा सुदुर्लभमेव।

श्रीबिह्लणः कविकुले क्व महाकवीन्द्रः
स्वल्पाक्षरैः परिचितः क्व च वा जनोऽयम्।
अद्यापि किन्तु पदमेकमाव्य मूलं
चन्द्रं ग्रहीतुमिव मेऽयमहो प्रयासः।।[2]

सुरभारतीसन्देश आचार्यवासुदेवद्विवेदिनां देववाणीरागं दर्शयति। यत्र स्वयमेव साक्षात् भगवती सरस्वती आगत्य ब्रवीति यज्जना मां कठिनां मत्वा त्यजन्ति, इत्थमाकर्ण्य गुरुवरोऽवसीदति संस्कृतप्रचाराय महतोत्साहेन तया भारत्या साकं तत्कालीनां संस्कृतदशां वर्णयति। श्रोतव्यं सुरभारतीवचनम्—

कालेऽस्मिन् निजदेशजातिविषये कर्णे पिधायांगुलीः
नेत्रे चापि निमील्य वाचि निपुणं दत्त्वा दृढामर्गलाम्।
श्रीमन्तो यदि शेरते सुखमये शय्यातले पण्डिताः
स्वं देशं प्रति भो भवेददयमहो विश्वासघातो महान्[3]

संस्कष्तसंरक्षणाय च संकल्पः क्रियते। अयं सुरभारतीसन्देशः सर्वैरपि संस्कृतानुरागिभिः दर्शनीयो वर्तते। एषां संस्कृतसंवर्धकाः शिष्या अगणिता अधुना देशे विदेशे संस्कृतं प्रचारयन्ति। एतेषाम् आजीवनं संस्कृतप्रचारं विलोक्य बहुभिः संस्थानैरेते पुरस्कृताः सम्मानिताश्च संजाताः। भारतसर्वकारेण राष्ट्रपतिसम्मानेन किंच उत्तरप्रदेशसंस्कृतसंस्थानेन विश्वभारतीसम्मानेन आचार्यवरो वासुदेवद्विवेदिशास्त्रिवरः सम्मानितः। गुरुवरामृतवचनधन्येन मयारविन्देन द्वादशसर्गात्मकं काव्यं वासुदेवचरितमिति गुरुऋणमुक्त्यभिलाषमिच्छता रचितमस्ति। तेषामेषां विषये स्वकीये नव्ये उपन्यासे हा हन्त इत्याख्येऽपि महनीयोऽयं गुरुराचार्यवासुदेवद्विवेदी शास्त्रिवरः सादरं शिष्येण मया मन्दबुद्धिना स्मष्तो दष्श्यते। श्रूयतां तावत्—

महापुरुषा न भोगं लिप्सन्ते सांसारिका इवेति सर्वविदितमेव। न च वा साधारणमानवा इव जीवितुमुत्सहन्ते। अस्य विदुषो मनसि छात्रावस्थात एव देशसेवा समागता आसीत्। यस्मात् स्वनामधन्योऽयं न कदापि सेवावष्त्तिमैच्छत्। संस्कृतसेवाकार्यं धर्मप्रचारकार्यं वानयोरेकं जीवने कर्त्तव्यमिति विभाव्य मात्रा विबोध्यमानेनापि सेवा न स्वीकृता। कथं पारिवारिको जीवनरथो द्रव्याश्वं विना चलिष्यतीति जनन्या बहुधोक्तोऽपि वासुदेवो न स्वकर्मणो विचचाल। विमुक्ता मोहपाशं भिन्दन्ति न कदापि तेन बद्धा जीवनं यापयन्तीति दृश्यते लोके। क्व नु खलु दिव्यपुरुषाः परिवारपरिधौ तिष्ठन्ति!। 'द्वे विद्ये वेदितव्ये परा चैवापरा' चेति हृदि भावयन् किं च संस्कृतभाषा देवभाषा यत्र ज्ञानविज्ञानराशिरवाप्यते, इयमध्येतव्या ज्ञातव्या सेवितव्येति मत्वा नगरे नगरे, ग्रामे ग्रामे, सदने सदने, जन—जन—वदने केन प्रकारेण संस्कृतं प्रसरेदिति विचिन्त्य वासुदेवेन भगवतो विश्वनाथस्य नगर्यां वाराणस्यां सार्वभौमसंस्कृतकार्यालयनाम्नीं संस्थां संस्थाप्य संस्कृतप्रचार आरब्धः, सैव संस्था अग्रे सार्वभौमसंस्कृतप्रचारसंस्थानमिति नाम्ना जगति ख्यातिं लेभे।

प्रचारयति संस्कृतं तस्मिन् मूर्खेषु कोलाहलः, अलसविद्वच्छिरोमणिषु कम्पनम्, अभद्रेषु वाग्भयम्, पण्डितम्मन्येषु मानहानिः, अकविषु प्रलापः, पूजकपुरोहितेष्वमर्षः, संस्कष्तभक्षेषु कोपः, कतिपयसंस्कृताध्यापकेषु गर्वावेगः, असाधुवृत्तिषु स्वेदोद्गमः, दैवीवाक्कठिनेति वदतां नाशः, न संस्कृतानुरागिणामासीत्। किंच गीर्वाणवाणीसमुपासकेषु प्रहर्षः, सुजनेषु अमन्दानन्दः, मुनिषु शास्त्रालोपाशंकालोपः, तत्कालीनसंस्कृतपाठकालस्यदर्शनखिन्नेषु समुल्लासः, बुद्धिमत्सु रागोदयः, पादपेषु प्ररोहः, पुष्पेषु विकासः, सद्गुरुषु संस्कृतसूर्योदयोद्गमः, सुरभारतीबोधोत्सुकेषु संख्यावष्द्धिः, मठमन्दिरेषु शुद्धस्तुतिमन्त्रस्वरोच्चारणोदयः, सच्छिष्येषु शास्त्रपरिशीलनौत्सुक्याविर्भावः न संस्कष्तेतरदुष्टप्रवृत्तीनां तन्नाशाभिलाषवतामदृश्यत।[4]

**सन्दर्भः**

1 वासुदेवचरितम् (संस्कृतपथिकचरतिम्) 4/14 अरविन्दकुमारतिवारीविरचितम्। शारदासंस्कृतसंस्थान, 27/59 जगतगंज, वाराणसी 2014
2 'अद्यापि' काव्यम्, प्रणेता आचार्यवासुदेवद्विवेदी शास्त्री। प्रस्तावना 38
3 सुरभारतीसन्देशः। आचार्यवासुदेवद्विवेदी शास्त्री।
4 हा हन्त उपन्यासः। तष्तीयोच्छ्वासः। अरविन्दकुमारतिवारीविरचितः। सत्यम् पब्लिसिंग हाऊस, एन 3/25 मोहनगार्डन नई दिल्ली 2017

**शेषभागःआगामीअंके**

# कुशीनगरे पंचदिवसीया संस्कृतवाग्व्यवहारकार्यशाला संपन्ना

–नूतनविष्णुरेग्मी

उत्तरप्रदेशसंस्कृतसंस्थानम्–लखनऊ एवं राज्य–शैक्षिक –अनुसंधान–एवं–प्रशिक्षण–परिषद्–लखनऊ इत्यनयोः संस्थयोः संयुक्ततत्वावधानेन पंचदिवसीयायाः संस्कृत–वाग्व्यवहार–कार्यशालायाः समायोजनं दिनांकः 27/11/2018 तः 1/12/2018 पर्यंतम् (D.I.E.T)जिल्ला–शिक्षा एवं प्रशिक्षणसंस्थानम्,कुशीनगरे जातम्। अस्याः समुद्घाटनसमारोहः

27/11/2018 दिनांके प्रातः 10 वादने जातः

आसीत।28/11/2018 तमे दिनांके कार्यशालायां सर्वान् संबोधयितुं प्रेरयितुं च संस्थानपक्षतः श्रीसुशीलकुमारमहोदयस्य समागमनं जातमासीत्।29/11/2018 तमे दिनांके सर्वेभ्यः प्रक्षिक्षुभ्यः संस्थानस्य



अभ्याससंचिकाः वितरिताः आसन्। अस्याः कार्यशालायाः समापनसमारोहः 01/12/2018 तमे दिनांके सम्पन्नः अभवत।समापनात् पूर्वं उत्तरप्रदेशसंस्कृतसंस्थानस्य गोरक्षपरिक्षेत्रसमन्वयकः एवं संस्कृतभारत्याः गोरक्षप्रान्तस्य सहप्रान्तमंत्री श्रीनागेशदूबेमहोदयः स्वस्य सारगर्भितं मन्तव्यं सरलसंस्कृतसंभाषणमाध्यमेनाश्रावयत्। तत्र




संस्कृतभारत्याः कार्यकर्तुः श्रीमदनमोहनपाण्डेयमहोदयस्य अपि सान्निध्यं आसीत् । ततः समापनसमारोह : समारब्धः यंत्र मंचसंचालकः विनयतोषमहोदयः (प्रशिक्षुः)आसीत्। कार्यक्रमस्य मुख्यातिथिः वीरेन्द्रप्रतापसिंहः (उप–प्राचार्यःकुशीनगरम् D.I.E.T.)एवं अध्यक्षः राम–आधार–तिवारी( प्रशिक्षकः–D.I.E.T कुशीनगरम्) आस्ताम्। आदौ वैदिकमंगलाचरणम् राजेशरविप्रकाशौ (प्रशिक्षू)कृतवन्तौ। अतिथयश्च सरस्वतीपूजनं,दीपधूपप्रज्ज्वलनं च कृतवन्तः। मंचासीनानां अतिथीनां पुष्पैः स्वागतं संस्कृतप्रशिक्षकैः कृतम्। मंचासीनौ मान्यौ अतिथी स्वोद्बोधनकथनावसरे संस्कृतभाषायाः विश्वस्तरे महत्वं प्रतिपादयन् एतादृक्कार्यशालाः संचालितवते, प्रचारितवते एवं प्रसारितवते उत्तरप्रदेशसंस्कृतसंस्थानाय धन्यवादज्ञापनं कृतवन्तौ। ततः प्रशिक्षुगणेषु केचन(नीतासिंहप्रभासिंहपरमानन्दविपिनादयः)मंचं आगत्य स्वप्रतिभाप्रदर्शनं कृतवन्तः अनुभवकथनं च श्रावितवन्तः। तदनन्तरं तेभ्यः भागग्रहणप्रमाणपत्रवितरणकार्यक्रमः आसीत्।

कार्यक्रमे प्रशिक्षकाः गोरखनाथः,सत्यमतिवारी, शिवप्रताप मिश्रः,नूतनविष्णुरेग्मी,कृष्णमुरारीतिवारी च उपस्थिताः आसन्। एते एव कार्यशालायां अस्याम् उपस्थितानां 103 प्रशिक्षूणां (सर्वकारीयविद्यालयीयशिक्षकाणां) पंचसु दिवसेषु प्रक्षेपकयंत्रं संगणकं च प्रयुज्य PPT SLIDES द्वारा प्रतिदिनं प्रशिक्षणं गणद्वये (गौतमगणे बुद्धगणे च)कृतवन्तः। एतदतिरिच्य बहुविधव्यवस्थां अपि एते एव दृष्टवन्तः। कार्यशालायां संस्थानपक्षतः श्रीनागेशदूबेमहोदयस्य एवं D.I.E.T. कुशीनगरतः तत्रत्यस्य प्राचार्यस्य (कार्यशालायाः संयोजकस्य )श्रीमनमोहनशर्मणः च महत्वपूर्णा भूमिका आसीत्। सायं 5 वादने सर्वेषां घन्यवादज्ञापनेन शान्तिमन्त्रस्य सहपाठेन च समापनसमारोहस्यास्य पंचदिवसीया–संस्कृतवाग्व्यवहारकार्यशालायाः च सम्पूर्चिः अभवत्।

# नवोदयविद्यालयेष्वपि भविष्यति संस्कृतम्

मानवसंसाधन विकासमंत्रालयस्याधीन नवोदयविद्यालय समिति माध्यमेन संचालित नवोदय विद्यालयेष्वपि छात्रान् संस्कृताध्ययनस्य अवसरः मिलिष्यन्ति। नवोदयविद्यालयसमिति पक्षतः 14 दिसम्बर 2018 वर्षे एकं पत्रं प्रस्तौतम्। येषु संर्वान् क्षेत्रीय उपायुक्तान् संस्कृत विषयं नूतन सत्रतः सर्वेषु विद्यालयेषु उपलब्ध करणार्थं उक्तवन्तः। तेन सह एवं सर्वं सूचना प्रेषणार्थं उक्तवन्तः। 1986 तः प्रत्येकस्मिन् मण्डले संचालित एषु आवासीय विद्यालयुषे आंग्ल भाषया



सह सर्वाः भारतीय भाषायाः अध्यापनं प्रचलति स्म परञ्च संस्कृतविकल्पः इदानींतन समय पर्यन्त उपलब्धः नासीत्। संस्कृत शिक्षक संघ दिल्ली 5 वर्षेन् सह विभिन्न स्तरे अस्य चर्चा करोति स्म। शिक्षा संस्कृति–उत्थान न्यासस्य सचिव श्रीअतुलकोठारी महोदयस्य नेतृत्वे माननीय प्रधानमंत्री एवं माननीय मा स. वि.मंत्री महोदयेनापि आस्मिन् विषये उक्तवान। अस्मिन् सन्दर्भे सं शि संघ दिल्ली इत्यस्य पदाधिकारयः नवोदय विद्यालय समितेः आयुक्त श्री वी.के.सिंह महोदयेन सह किञ्चित् मास पूर्वं मिलित्वा ज्ञापनमपि दत्तवन्तः। नवोदय विद्यालये संस्कृत विषय उपलब्ध करर्णा सं.शिं संघ दिल्ली महासचिव डॉ. वी दयालु एवं अध्यक्ष डॉ. ब्रजेशगौतमः भारतसर्वकार एवं नवोदय विद्यालय समिते आभारं व्यक्तवन्तौ। संस्कृतस्य अध्यापनेन छात्रः भारतीय संस्कृतेः मूलतत्वेन् परिचितं भविष्यति। सं.शि.संघ दिल्ली मीडिया सचिव डॉ. ऋषिशर्मा सर्वकारस्य आभारं व्यक्तवती एवं उक्तवती यत् इदानीं संस्कृत अतिरिक्त विषयरुपेण अध्यापनार्थं आदेशः प्रेषितवान परञ्च अनन्तरं मुख्यविषय रुपे भवितव्यम्। अनेन् छात्रः संस्कृतस्य ज्ञानभण्डारेण् लाभान्वित भवितुं शक्यते।

**प्रथमपुटस्य शेषभागः**

## देववाणी–परिषदः त्रिचत्वारिंशत्....

प्रथमपुटस्य शेषभागः

नामस्य घोषणा कृतवान। इतः पूर्वं हंसराज महा.विद्यालयस्य छात्र आशुतोषझा स्वास्तिवाचनं कृतवान एवं संस्थायाः महासचिव डॉ. ऋषिराजपाठकः स्वागतसमये देववाणिपरिषदस्य स्थापनायां



प्रकाशं दत्तवान। अनन्तरं सुश्री प्रीतिझा इत्यस्याः निर्देशने सेन्तमार्क विद्यालयस्य छात्राः श्लोकपाठ एवं अन्य कार्यक्रमस्य आयोजनं कृतवत्यः। अन्याः भाषायाः कवयोऽपि श्रेष्ठतम रचना प्रस्तुतवन्तः। समारोहाध्यक्ष पद्मश्री डॉ.रमाकान्तशुक्लः स्वोद्बोधने भारतीयसंस्कृति एवं देववाणी संस्कृतेः महत्वे चर्चा कृत्वा संस्कृतेः पर्यायः उक्तवान। अस्मिन्नवसरे उपस्थित संस्कृतप्रेमी, विद्वद्जन एवं क्षेत्रस्य गणमान्य जनाः गायत्री परिवारस्य श्री.के.एल.सचदेव, सं.शि.संघस्याध्यक्ष ब्रजेशगौतमः, संस्कृतसंवादस्य सम्पादक श्री वेदप्रकाशशर्माजी, श्री नत्थीसिंहबघेला एवं श्रीमुनिराजपाठकः साहित्यअकादमीसम्मान घोषणानन्तरं श्री रमाकान्तशुक्लस्य अभिनन्दनं कृतवान। अन्ते धन्यवादज्ञापनं एवं शान्तिपाठेन् सह कार्यक्रमस्य समापनं जातम्।

अस्माकं प्रेरणास्त्रोतः– स्व.पं० रामकिशोरशर्मा,
परामर्शकाः–डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः
सम्पादिका–मञ्जूशर्मा, उपसम्पादकः– डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ– वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल–ऑफसेट–प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली–53तः मुद्रापयित्वा ए–2/32, वजीराबादमार्गः भजनपुरा, देहली–53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई–मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2018-20 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।